# Bharatam Mahaniyam

# ભારતં મહનીયમ્

## Document Information

Text title : Bharatam Mahaniyam

File name : bhArataMmahanIyam.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : vijayan vi. paTTAmbI

Acknowledge-Permission: Vijayan V. Pattambi

Latest update : August 11, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 12, 2024

*sanskritdocuments.org*

Bharatam Mahaniyam

# ભારતં મહનીયમ્

ભારતં મહનીયમ્ ।

ભારતં જનાયત્તં મહનીયં મહીતલં
મહતા પ્રયાસેન દેશિકૈઃ સમુદ્ધૃતમ્ ॥ ૧॥

શતઞ્ચ તત: પુનસ્ત્રિંશત્કોટિમિતાઃ
જનાશ્ચ નિવસન્તિ વિભિન્નધર્માશ્રયાઃ ॥ ૨॥

ગઙ્ગયા યમુનયા પુણ્યનિલયા કાવેર્યા ચ
સન્તતં કલગીતૈરાશંસા: સમાર્ચિતાઃ ॥ ૩॥

હિમવાન્મહીધરો ભારતસંરક્ષક -
શ્ચોન્નતશિરા ભૂત્વા ઉત્તરે વિરાજતે ॥ ૪॥

બલવાન્ શત્રૂન્ સર્વાનુત્તરાન્ મહાવીર્યાન્
વારણં કૃત્વા નિત્યં ભારતમસેવત ॥ ૫॥

ધાવયન્ત્યો નિત્યં પાદારવિન્દૌ ભક્ત્યા
સિન્ધુવીચયો હન્ત ! દેશોઽયં પર્યલાલયન્ ॥ ૬॥

સાગરતીરેષ્વેવ ભારતદેશસ્યાસ્ય
વાણિજ્યં વૃદ્ધિમાપ સુસ્થિરં નિરાશ્રયમ્ ॥ ૭॥

સજ્જનો મહાત્માનઃ બહવો કૃતયત્નાઃ
જીવનં ધન્યં કૃત્વા રાજન્તે સુરલોકે ॥ ૮॥

શઙ્કરો મહાગુરુરદ્વૈતમન્ત્રાન્ કૃત્વા
કિઙ્કરાનકરોત્ સ લોકાન્ ધર્માશ્રયાન્ ॥ ૯॥

સત્યમેવાત્ર નિત્યં વિજયતેતરામિતિ
ઉત્તમમુચ્ચૈસ્તરં ઘોષયદ્રાષ્ટ્રં ચૈતત્ ॥ ૧૦॥

ઋષયો બહવશ્ચાસન્ ધર્મસ્ય સંરક્ષકાઃ

શૌનક વ્યાસ શુક ગૌતમ પરાશરાઃ ॥ ૧૧॥

સંસ્કૃતં દિવ્યામૃતં સજ્જનૈઃ સંસેવિતં
તદ્ભાષાપ્રથિતં તદ્ભારતમહાપુણ્યમ્ ॥ ૧૨॥

દીપયન્મહીતલં કાવ્યૈશ્ચ શાસ્ત્રાદિભિઃ
શોભતે સુભાષિતૈરાચન્દ્રતારં દેશે ॥ ૧૩॥

ભારતમિતિહાસં મહત્તમં પારાશર્યં
સપાદલક્ષાત્મકશ્લોકૈરલઙ્કૃતમ્ ॥ ૧૪॥

ઉપદેશસહસ્રૈસ્તદનુદિનં રાષ્ટ્રસ્યાસ્ય
જીવનમાર્ગેષ્વદ્ય બહુભ્યો દીપાયતે ॥ ૧૫॥

સુખિનો ભવન્તુ જનાઃ દેશેઽસ્મિન્નહર્નિશં
આમયાન્ વિના સર્વે મોદન્તામનારતમ્ ॥ ૧૬॥

— વિજયન્ વિ. પટ્ટામ્બિ

---

*Bharatam Mahaniyam*

pdf was typeset on August 12, 2024

Please send corrections to *sanskrit@cheerful.com*